# ३२. पादुका सहस्रम् - फल पद्धतिः (३८)

उपाख्यातां तथात्वेन वसिष्ठाद्यै र्महर्षिभिः ।
उपाय फलयोः काष्ठा मुपासे रामपादुकाम् ॥ ३२.१॥ ९७१॥

निविशेय निरन्तरं प्रतीत स्त्रिदशानां विभवं तृणाय मत्वा ।
सविधे तव देवि रङ्गभर्तुः पदलीला कमलं समुद्वहन्त्याः ॥ ३२.२॥ ९७२॥

किमहं मणिपादुके त्वया मे सुलभे रङ्गनिधौ श्रिया सनाथे ।
करणानि पुनः कदर्थयेयं कृपणद्वार दुरासिकादि दुःखैः ॥ ३२.३॥ ९७३॥

सकृदप्यनुभूय रङ्गभर्तुः त्वदुपश्लेष मनोहरं पदाब्जम् ।
अपुनर्भव कौतुकं तदैव प्रशमं गच्छति पादुके मुनीनाम् ॥ ३२.४॥ ९७४॥

अपरस्पर पातिना ममीषां
अनिदम्पूर्व निरूढ सन्ततीनाम् ।
भरत व्यसनाद नून सीम्नां
दुरितानां मम निष्कृति स्त्वमासीः ॥ ३२.५॥ ९७५॥

त्वदुपासन संप्रदायविद्भिः
समये सात्त्वत सेविते नियुक्ताः ।
भरत व्रतिनो भवाम्बुराशिं

कतिचित् काञ्चन पादुके तरन्ति ॥ ३२.६॥ ९७६॥

अलमच्युत पादुके यथावत्
भवती यच्च पदं त्वदेक धार्यम् ।
इतरेतर भूषितं तदेतत्
द्वितयं संवननाय चेतसो नः ॥ ३२.७॥ ९७७॥

अनन्य सामान्य तया मुरारेः
अङ्गेष्ववाप्तेषु किरीट मुख्यैः ।
पादावनि त्वं निजमेव भागं
सर्वात्म साधारणता मनैषीः ॥ ३२.८॥ ९७८॥

समाश्रितानां मणिपादुके त्वां
विपश्चितां विष्णुपदेऽप्यनास्था ।
कथं पुनस्ते कृतिनो भजेरन्
वासादरं वासव राजधान्याम् ॥ ३२.९॥ ९७९॥

विमृश्य रङ्गेश्वर पादरक्षे वारक्रमं नून मवारणीयम् ।
पद्माग्रहेऽपि स्पृशती प्रतीता स्थूलेन रूपेण वसुन्धरा त्वाम् ॥३२.१०॥९८०॥

अभिरक्षसि त्वमनपाय निधिं
मणिपादुके मधुभिद श्चरणम् ।

अत एव देवि तदनन्य धनाः
शिरसा वहन्ति भवतीं कृतिनः ॥ ३२.११॥ ९८१॥

पदयुग मिव पादुके मुरारेः
भवति विभूति रकण्टका त्वयैव ।
कथमिव हृदयानि भावुकानां
त्वदनुभवा दुपजात कण्टकानि ॥ ३२.१२॥ ९८२॥

ज्ञानक्रिया भजन सीम विदूर वृत्तेः
वैदेशिकस्य तदवाप्ति कृतां गुणानाम् ।
मौलौ ममासि मधुसूदन पादुके त्वं
गङ्गेव हन्त पतिता विधिनैव पङ्गोः ॥ ३२.१३॥ ९८३॥

रङ्गेश्वरस्य यदियं मणिपादरक्षे
पादारविन्द युगलं भवती समेतम् ।
पुंसा मुपोषित विलोचन पारणार्हं
क्षीरं तदेतदिह शर्करया समेतम् ॥ ३२.१४॥ ९८४॥

कामादि दोष रहितं त्वदनन्य कामाः
कर्म त्रयोदश विधं परिशीलयन्तः ।
पादावनि त्वदनुषङ्ग विशेष दृश्यं
एकान्तिनः परिचरन्ति पदं मुरारेः ॥ ३२.१५॥ ९८५॥

मौलौ स्थिता मखभुजा मथवा श्रुतीनां
तद्रङ्गराज चरणावनि वैभवं ते ।
अस्मादृशा मपि यदि प्रथितं ततः स्यात्
सौलभ्य मम्ब तदिदं तव सार्वभौमम् ॥ ३२.१६॥ ९८६॥

स्वप्नेऽपि चेत् त्वमसि मूर्धनि सन्निविष्टा
नम्रस्य मे नरक मर्दन पादरक्षे ।
स्थाने तदेतदिह देवि यतः समाधौ
सन्तो विदुस्तमपि तादृश बुद्धि गम्यम् ॥ ३२.१७॥ ९८७॥

बद्धाञ्जलिः परिचर न्नियमेव रङ्गे
विश्राणि ताच्युत निधिं मणिपादुके त्वाम् ।
कस्यापि कूणितदृशो धनिनः पुरस्तात्
उत्तानयेय न कदाऽपि करं विकोशम् ॥ ३२.१८॥ ९८८॥

त्वय्यर्पितेन चरणेन सदध्व भाजः
पादावनि प्रथित सात्त्विक भाव दृश्याः ।
रङ्गेशव द्विदधते मुहुरङ्ग हारान्
रङ्गे महीयसि नटा इव भावुकास्ते ॥ ३२.१९॥ ९८९॥

येन स्थिता शिरसि मे विधिनाऽधुना त्वं

तेनैव देवि नियतं मम साम्पराये ।
लक्ष्यी करिष्यसि पदावनि रङ्गनाथं
लक्ष्मी पदाम्बुरुह यावक पङ्क लक्ष्यम् ॥ ३२.२०॥ ९९०॥

हरिचरण सरोजे भक्ति भाजां जनानां
अनुकरण विशेषै रात्मनै वोपहास्यम् ।
परिणमय दयार्द्रा पादुके तादृशं मां
भरत परिषदन्त र्वर्तिभिः प्रेक्षणीयम् ॥ ३२.२१॥ ९९१॥

दुरित मपनयन्ती दूरतः पादुके त्वं
दनुज मथन लीलां देवता मानयन्ती ।
अनितर शरणाना मग्रिम स्यास्य जन्तोः
अवश करणवृत्ते रग्रतः सन्निधेयाः ॥ ३२.२२॥ ९९२॥

चरम निगम गीते सप्ततन्तौ समाप्ते
निज सदन समीपे प्रापयिष्यन् विहारम् ।
ज्वलन मिव भवत्योः सम्य गारोपयेन्मां
प्रथम वरण वश्यः पादुके रङ्गनाथः ॥ ३२.२३॥ ९९३॥

पुनरुदर निवासच्छेदनं सह्य सिन्धोः
पुलिन मधिवसेयं पुण्य माब्रह्म लाभात् ।
परिणमति शरीरे पादुके यत्र पुंसां

त्वमसि निगम गीता शाश्वतं मौलिरत्नम् ॥ ३२.२४॥ ९९४॥

बहुविध पुरुषार्थ ग्राम सीमान्त रेखां
हरिचरण सरोज न्यास धन्या मनन्यः ।
भरत समय सिद्धां पादुके भावयंस्त्वां
शतमिह शरदस्ते श्रावयेयं समृद्धिम् ॥ ३२.२५॥ ९९५॥

तिलकयसि शिरो मे शौरि पादवनि त्वं
भजसि मनसि नित्यं भूमिकां भावनाख्याम् ।
वचसि च विभवैः स्वैर्व्यक्ति मित्थं प्रयाता
तदिह परिणतं मे तादृशं भागधेयम् ॥ ३२.२६॥ ९९६॥

अजनिषि चिरमादौ हन्त देहेन्द्रियादिः
तदनु तदधिकः सन्नीश्वरोऽहं वभूव ।
अथ भगवत एवाभूव मर्था दिदानीं
तव पुनरह मासं पादुके धन्यजन्मा ॥ ३२.२७॥ ९९७॥

त्वय्यायत्तौ भगवति शिला भस्मनोः प्राणदानात्
आस्त्री बालं प्रथित विभवौ पादपद्मौ मुरारेः ।
तामेवाहं शिरसिनि हिता मद्य पश्यामि दैवात्
आत्माधारां जननि भवती मात्म लाभ प्रसूतिम् ॥ ३२.२८॥ ९९८॥

कथङ्कारं लक्श्मी करकमल योग्यं निजपदं
निदध्या द्रङ्गेशः कुलिश कठिनेऽस्मिन्मनसि नः ।
न चेदेवं मध्ये विशति दयया देवि भवती
निजाकान्ति क्षुण्ण स्मरशर शिखा कण्टकततिः ॥ ३२.२९॥ ९९९॥

क्रीडालौल्यं किमपि समये पादुके वर्जयन्ती
निर्वेशं स्वं दिशसि भवती नाथयोः श्रीधरण्योः ।
मामप्येवं जनय मधुजित्पादयो रन्तरङ्गं
रङ्गं याऽसौ जनयसि गुणै र्भारती नृत्तरङ्गम् ॥ ३२.३०॥ १०००॥

इति रङ्गधुरीण पादुके त्वं
स्तुति लक्ष्येण सहस्रशो विमृष्टा ।
सफलं मम जन्म ताव देतत्
यदिहाशास्य मतः परं किमेतत् ॥ ३२.३१॥ १००१॥

मातः स्वरूप मिव रङ्गपते र्निविष्टं
वाचाम सीमनि पदावनि वैभवं ते ।
मोहा दभिष्टुतवतो मम मन्दबुद्धेः
बालस्य साहसमिदं दयया सहेथाः ॥ ३२.३२॥ १००२॥

ये नाम भक्ति नियताः कवयो मदन्ये
मातः स्तुवन्ति मधुसूदन पादुके त्वाम् ।

लप्स्ये गुणांश विनिवेशित मानसानां
तेषामहं सबहुमा नविलोकितानि ॥ ३२.३३॥ १००३॥

सङ्घर्षयन्ति हृदया न्यसतां गुणांशे
सन्तस्तु सन्तमपि न प्रथयन्ति दोषम् ।
तद्रङ्गनाथ चरणावनि ते स्तुतीनां
एका परं सहसतोरिह साक्षिणी त्वम् ॥ ३२.३४॥ १००४॥

इत्थं त्वमेव निजकेलि वशा दकार्षीः
इक्ष्वाकुनाथ पद पङ्कजयो रनन्या ।
स्वीयं पदावनि मया सुमहच्चरित्रं
सीतेव देवि सहजेन कवीश्वरेण ॥ ३२.३५॥ १००५॥

पृथुक वदन शङ्ख स्पर्शनीत्या कदाचित्
शिरसि विनिहितायाः स्वेन भूम्ना तवैव ।
स्तुतिरिय मुपजाता मन्मुखेने त्यधीयुः
परिचरण परास्ते पादुकेऽपास्त दोषाः ॥ ३२.३६॥ १००६॥

यदिस्फीता भक्तिः प्रणय मुख वाणी परिपणं
पदत्राण स्तोत्रं हृदि बिभृत रङ्गक्षितिभृतः ।
निरुन्मादो यद्वा निरबधिसुधा निर्झरमुचो
वचोभङ्गीरेता न कथमनुरुन्धे सहृदयः ॥ ३२.३७॥ १००७॥

जयति यतिराज सूक्ति र्जयति मुकुन्दस्य पादुका युगली ।
तदुभय धना स्त्रिवेदी मवन्ध्ययन्तो जयन्ति भुवि सन्तः॥ ३२.३८॥ १००८॥

इति श्रीकवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
फल पद्धतिः द्वात्रिंशी ॥

इति श्रीकवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रं सम्पूर्णम् ॥

कवितार्किक सिंहाय कल्याण गुण शालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः ॥